श्रीः
श्रीमत्परांकुशाय नमः
श्रीमते रामानुजाय नमः
श्रीमद्वरवरमुनये नमः

# कैशिकपुराणं

श्रीशैलेश दयापात्रं धीभक्त्यादि गुणार्णवम्
यतींद्रप्रवणं वंदे रम्यजामातरं मुनिम्
लक्ष्मीनाथसमारंभां नाथयामुनमध्यमाम्
अस्मदाचार्यपर्यंतां वंदे गुरपरंपराम्
योनित्यमच्युतपदांबुजयुग्मरुक्म
व्यामोहतस्तदितराणि तृणाय मेने
अस्मद्गुरोर्भगवतोऽस्य दयैकसिंधोः
रामानुजस्य चरणौ शरणं प्रपद्ये ।
मातापितायुवतयस्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम्
आद्यस्य नः कुलपतेर्वकुळाभिरामम्
श्रीमत्तदंघ्रियुगळं प्रणमामि मूर्ध्ना।
भूतंसरश्च महदाह्वय भट्टनाथ
श्रीभक्तिसार कुलशेखर योगिवाहान्
भक्तांघ्रिरेणु परकाल यतींद्रमिश्रान्
श्रीमत्परांकुशमुनिं प्रणतोऽस्मि नित्यम्।
एतत्त्रैलोक्यनिर्माणत्राण संहारकारणम्
श्रीमच्छ्रीरंगनाथस्य शासनं शाश्वतं परम्।





श्रीमच्छ्रीरंगनायक्या श्श्रियस्त्रैलोक्यमंगळम्
परावरेश्वर शिरश्चूडा संचारिशासनम्।
योनित्यमच्युत पदांबुज युग्मरुक्म
व्यामोहतस्तदितराणि तृणाय मेने
अस्मद्गुरो र्भगवतोऽस्य दयैकसिंधोः
रामानुजस्य चरणौ शरणं प्रपद्ये ।
माता पिता युवतयस्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम्
आद्यस्य नः कुलपतेर्वकुळाभिरामम्
श्रीमत्तदंघ्रियुगळं प्रणमामि मूर्ध्ना।
तत्वेन यश्चिदचिदीश्वर तत्स्वभाव
भोगापवर्ग तदुपाय गतीरुदारः
संदर्शयन्निरमिमीत पुराणरत्नम्
तस्मै नमो मुनिवराय पराशराय।१०
श्रीवत्सचिह्नमिश्रेभ्यो नम उक्तिमधीमहे
यदुक्तयस्त्रयीकंठे यांति मंगळसूत्रताम्।
शठरिपुकलिजित्सरोभूत वेताळगोदागुरून्
मुनिमथ कुलशेखरं भक्तपद्रेणु भक्त्यर्णवौ
मधुरकविमथो यतींद्रं तथान्यानशेषान्गुरून्
श्रियमपि वसुधां च नीळां च वैकुंठनाथं श्रये।
श्रीरंगचंद्रमस मिंदिरयाविहर्तुम्
विन्यस्य विश्वचिदचिन्नयनाधिकारम्
यो निर्वहत्यनिशमंगुळिमुद्रयैव

सेनान्यमन्यविमुखास्तमशिश्रियाम।
श्रीवत्सांकस्य नप्तारं पौत्रं रामविपश्चितः
व्यासं वाग्जयिनः पुत्रमस्माकं तातमाश्रये।
वेदाचार्यं विपश्चिज्जनमहितधियं विश्रुतज्ञानसिंधोः
वेदव्यासस्यपुत्रं वरगुणजलधेर्वाग्विजेतुश्च पौत्रम्
रंगेशापत्यभावं समधिगतवतो रामसूरेः प्रपौत्रम्
श्रीवत्सांकस्य कूरान्वयकुमुदविधोः
पंचमं संश्रयामः।१५
श्रीपराशरभट्टार्य श्श्रीरंगेश पुरोहितः
श्रीवत्सांकसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे।।
प्रलयोदन्वदुत्तीर्णां प्रपद्येऽहं वसुंधराम्
महावराह दंष्ट्राग्र मल्लीकोश मधुव्रताम्।
नमस्तस्मै वराहाय लीलयोद्धरते महीम्
खुरमध्यगतो यस्य मेरुः कणकणायते।
तस्य यज्ञवराहस्य विष्णोरमिततेजसः
प्रणामं येऽपि कुर्वंति तेषामपि नमोनमः ।
श्रीवराह उवाच
जागरे तु विशालाक्षि जानतो वाप्यजानतः
यो मे प्रगायते गेयं मम भक्त्या व्यवस्थितः ।।१
यावंति त्वक्षराण्यस्य गायतस्स्युर्यशस्विनि
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ।।२
रूपवान् गुणवान् शुद्धः सर्वधर्मभृतां वरः
नित्यं पश्यति वै शक्रं वज्रहस्तं न संशयः ।।३





सर्वधर्मगुणश्रेष्ठः तत्रापि मम लुब्धकः ।
इंद्रलोकात्परिभ्रष्टो मम गेयपरायणः
प्रमुक्तस्सर्वसंसारान्मम लोकं च गच्छति ।।४
एवं तु वचनं श्रुत्वा तत्प्रसादाद्वसुंधरा।
वराहरूपिणं देवं प्रत्युवाच शुभानना ।।५
अहो गीतप्रभावो वै यस्त्वया परिकीर्तितः
कच्चिद्गीतप्रभावेन सिद्धिं प्राप्तो महातपाः ।।६
श्रीवराह उवाच
शृणु तत्त्वेन ते भूमि कथ्यमानं यशस्विनि
यस्तु गीतप्रभावेन सिद्धिं प्राप्तो महातपाः ।।७
मम तत्राश्रमे भद्रे चंडालः कृतनिश्चयः
दूराज्जागरणे गाति मम भक्त्या व्यवस्थितः ।।८
एवंतु गायमानस्य गतास्संवत्सरा दश
श्वपाकस्य गुणज्ञस्य मद्भक्तस्य वसुंधरे ।।९
कौमुदस्य तु मासस्य द्वादश्यां शुक्लपक्षके
सुप्ते जने गते यामे वीणामादाय निर्ययौ ।।१०
ततो वर्त्मनि चंडालः गृहीतो ब्रह्मरक्षसा
अल्पप्राणः श्वपाकोवै बलवान् ब्रह्मराक्षसः ।।११
दुःखेन स तु संतप्तो नचशक्तो विचेष्टितुम्
उवाचवचनं मंदं मातंगो ब्रह्मराक्षसम् ।।१२
गच्छामि संतोषयितुं अहं जागरणे हरिम्
गानेन पुंडरीकाक्षं ब्रह्मराक्षस मुंच माम् ।।१३
एवमुक्तः श्वपाकेन बलवान् ब्रह्मराक्षसः

अमर्षवशमापन्नः न च किंचित्तमब्रवीत् ।।१४
आत्मानं गृह्य धावंतं चंडालः प्राह राक्षसम्
किंत्वया चेष्टितं मह्यं यएवं परिधावसि ।।१५
श्वपाकवचनं श्रुत्वा ततोवै ब्रह्मराक्षसः
उवाचवचनं घोरं मानुषाहारलोलुपः ।।१६
अद्य मे दशरात्रं वै निराहारस्य गच्छतः
धात्रा त्वं विहितो मह्यमाहारः कल्पितो मम ।।१७
अद्य त्वां भक्षयिष्यामि सवसामांसशोणितम्
तर्पयित्वा यथान्यायं यास्यामि च यथेप्सितम् ।।१८
ब्रह्मरक्षोवचः श्रुत्वा श्वपाको गीतलालसः
राक्षसं छंदयामास मम भक्त्या व्यवस्थितः ।।१९
शृणु तत्त्वं महाभाग भक्ष्योऽहं समुपागतः
अवश्यमेतत्कर्तव्यं धात्राज्ञप्तं यथा वचः ।।२०
पश्चात्खादसि मां रक्षो जागरे विनिर्वर्तिते
विष्णोस्संतोषणार्थाय ममैतद्व्रतमुत्तमं ।।२१
रक्षमां व्रतभंगाद्वै देवं नारायणं प्रति
जागरे विनिवृत्तेतु मां भक्षय यथेप्सितम् ।।२२
श्वपाकस्यवचः श्रुत्वा ब्रह्मरक्षः क्षुधार्दितम्
उवाच मधुरं वाक्यं राक्षसः पिशिताशनः ।।२३
मोघं भाषसि चंडाल पुनरेष्याम्यहं त्विति
कोहि रक्षोमुखाद्भ्रष्टस्तन्मुखायाभिवर्तते ।।२४
बहवस्संति पंथानः देशाश्च बहवस्तथा
आत्मदेशं परित्यज्य परेषां गंतुमिच्छसि ।।२५





स्वशरीरविनाशाय न चागच्छति कश्चन
रक्षसो मुखविभ्रष्टः पुनरागंतुमिच्छसि ।।२६
राक्षसस्य वचः श्रुत्वा चंडालो धर्मसंश्रितम्
उवाच मधुरं वाक्यं तंदृष्ट्वा ब्रह्मराक्षसम् ।।२७
यद्यप्यहंहि चंडालः पूर्वकर्मविदूषितः
प्राप्तोऽहं मानुषं भावं विदितेनांतरात्मना ।।२८
शृणु तत्समयं रक्षो येनागच्छाम्यहं पुनः
दूराज्जागरणं कृत्वा लोकनाथस्य तृप्तये ।।२९
सत्यमूलं जगत्सर्वं लोकस्सत्ये प्रतिष्ठितः
नाहं मिथ्या प्रवक्ष्यामि सत्यमेववदाम्यहम् ।।३०
अद्यमे समयस्तत्र ब्रह्मराक्षस तच्छृणु
शपामि सत्येन गतो यद्यहं नागमे पुनः ।।३१
योगच्छेत्परदारांश्च काममोहप्रपीडितः
तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।३२
पाकभेदंतु यःकुर्यादात्मनश्चोपभोजिनः
तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।३३
दत्वा वै भूमिदानं तु पश्चादाच्छिंदते तु यः
तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।३४
स्त्रियं भुक्त्वा रूपवतीं पुनर्यस्तां विनिंदति
तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।३५
योऽमावास्यां विशालाक्षीं श्राद्धं कृत्वा स्त्रियं व्रजेत्
तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।३६
यस्तु कन्यां ददामीति पुनस्तां न प्रयच्छति

तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।३७

षष्ठ्यष्टम्योरमावास्यां चतुर्दश्यांच नित्यशः

अस्नातानां गतिं गच्छे यद्यहं नागमे पुनः ।।३८

मित्रभार्यां तु यो गच्छेत्कामबाणप्रपीडितः

तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।३९

अनन्यशरणां भार्यां यौवने यःपरित्यजेत्

तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।४०

गुरुपत्नीं राजपत्नीं येतु गच्छंति मोहिताः

तेषांगतिं प्रपद्येवै यद्यहं नागमे पुनः ।।४१

दास्यामीति प्रतिश्रुत्य नचयस्ततप्रयच्छति

गतिंतस्य प्रपद्येवै यद्यहं नागमे पुनः ।।४२

योवै दारद्वयं कृत्वा एकस्यां प्रीतिमान्भवेत्

तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।। ४३

गोकुलस्य तृषार्तस्य जलार्थमभिधावतः

विघ्नमाचरते यस्तु तत्पापं स्यादनागमे ।।४४

ब्रह्मघ्नेच सुरापेच चोरे भग्नव्रते तथा

यागतिर्विहिता सद्भिः तत्पापं स्यादनागमे ।।४५

वासुदेवं परित्यज्य येऽन्यं देवमुपासते

तेषांगतिं प्रपद्येवै यद्यहं नागमे पुनः ।।४६

नारायणमथान्यैस्तु देवैस्तुल्यं करोति यः

तस्य पापेन लिप्येयं यद्यहं नागमे पुनः ।।४७

चंडालवचनं श्रुत्वा परितुष्टस्तु राक्षसः

उवाच मधुर वाक्यं गच्छ शीघ्रं नमोऽस्तुते ।।४८





राक्षसेन विनिर्मुक्तश्चंडालः कृतनिश्चयः

पुनर्गायति मह्यं वै मम भक्त्या व्यवस्थितः ।।४९

अथ प्रभाते विमले विनिवृत्ते तु जागरे

नमो नारायणेत्युक्त्वा श्वपाकः पुनरागमत् ।।५०

गच्छतस्त्वरितं तस्य पुरुषः पुरतः स्थितः

उवाच मधुरं वाक्यं श्वपाकं तदनंतरम् ।।५१

कुतो गच्छसि चंडाल दूरं गमननिश्चितम्

एतदाचक्ष्व तत्त्वेन यत्रते वर्तते मनः ।।५२

समयो मे कृतो ब्रह्मन् ब्रह्मराक्षससन्निधौ

तत्राहं गंतुमिच्छामि यत्रासौ ब्रह्मराक्षसः ।।५३

श्वपाकवचनं श्रुत्वा पुरुषो भावशोधकः

उवाच मधुरं वाक्यं श्वपाकं तदनंतरम् ।।५४

नतत्र गच्छचंडाल मार्गेणानेन सुव्रत

तत्रासौ राक्षसः पापः पिशिताशी दुरासदः ।।५५

श्वपाको वचनं श्रुत्वा पुरुषं प्रत्युवाच ह।

नाहमेवं करिष्यामि यन्मांत्वं परिपृच्छसि

अहं सत्ये प्रवृत्तोवै शीलं सत्ये प्रतिष्ठितम् ।।५६

ततस्स पद्मपत्राक्षः श्वपाकं प्रत्युवाच ह

यद्येवं निश्चयस्तात स्वस्ति तेऽस्तु गमिष्यतः ।।५७

एवं तु ब्रुवमाणो वै श्वपाकस्संशितव्रतः

ब्रह्मरक्षोंतिकं प्राप सत्येतु कृतनिश्चयः ।।५८

उवाच मधुरं वाक्यं राक्षसं पिशिताशनम्

भवता समनुज्ञातो गाययित्वा यथेच्छया ।।५९

विष्णवे लोकनाथाय मम पूर्णो मनोरथः
एतानि मम चांगानि भक्षयस्व यथेच्छया ।।६०
श्वपाकवचनं श्रुत्वा ब्रह्मरक्षो भयानकम्
उवाच मधुरं वाक्यं श्वपाकं संशितव्रतम् ।।६१
त्वमद्य रात्रौ चंडाल विष्णोर्जागरणं प्रति
फलं गीतस्य मेदेहि जीवितं यदिचेच्छसि ।।६२
ब्रह्मरक्षो वचः श्रुत्वा श्वपाकः पुनरब्रवीत्
यत्त्वयाभाषितं पूर्वंमया सत्यंच यत्कृतम्
भक्षयस्व यथेष्टं मां दद्यां गीतफलं न तु ।।६३
उवाच मधुरं वाक्यं चंडालं ब्रह्मराक्षसः
अर्धार्धं तस्य मेदेहि पुण्यं गीतस्य यत्फलम्
ततो मोक्ष्यसि कल्याण भक्ष्यादस्माद्विभीषणात् ।।६४
ब्रह्मरक्षो वचः श्रुत्वा श्वपाकः संशितव्रतः
वाणीं श्लक्ष्णां  समादाय ब्रह्मराक्षसमब्रवीत् ।।६५
भक्ष्यामीति वचः श्रुत्वा गीतमन्यत्किमिच्छसि
श्वपाकस्य वचः श्रुत्वा ब्रह्मरक्षो भयावहम्
उवाच मधुरं वाक्यं श्वपाकं संशितव्रतम् ।।६७
एकयामस्य मेदेहि पुण्यं गीतस्य यत्फलम्
ततो यास्यसि कल्याण संगमं पुत्रदारकैः ।।६८
श्रुत्वा राक्षसवाक्यानि चंडालोऽभीतमानसः
उवाच मधुरं वाक्यं राक्षसं कृतनिश्चयः ।।६९
न यामस्य फलं दद्यां ब्रह्मरक्षस्तवेप्सितम्
पिबस्व शोणितं मह्यं यत्त्वया पूर्वभाषितम् ।।७०





श्वपाकस्य वचश्श्रुत्वा राक्षसः पिशिताशनः
सत्यवंतं गुणज्ञं च चंडालमिदमब्रवीत् ।।७१
एकगीतस्य मेदेहि यत्त्वया विष्णुसंसदि
निग्रहात्तारयास्माद्वै    तेन गीतफलेन माम्
एवमुक्त्वा तु चंडालं राक्षसश्शरणं गतः ।।७२
श्वपाक उवाच
किंत्वया विकृतंकर्म कृतपूर्वं तु राक्षस
कर्मणो यस्य दोषेण राक्षसीं योनिमाश्रितः ।।७३
राक्षस उवाच
नाम्ना वै सोमशर्माऽहं चरको ब्रह्मयोनिजः
सूत्रमंत्रपरिभ्रष्टो यूपकर्मण्यधिष्ठितः ।।७४
ततस्त्वकारयं यज्ञं लोभमोहप्रपीडितः
यज्ञे प्रवर्तमाने तु शूलदोषस्त्वजायत ।।७५
लाभालाभस्य दोषेण प्राप्तोऽहं राक्षसीं तनुम्
त्वंवै गीतप्रभावेन निस्तारयितुमर्हसि ।।७६
ब्रह्मरक्षो वचः श्रुत्वा श्वपाकः संशितव्रतः
बाढमित्यब्रवीद्वाक्यं ब्रह्मराक्षसचोदितः ।।७७
यन्मया पश्चिमंगीतं स्वं कैशिकसंज्ञकम्
फलेन तस्य भद्रंते मोक्षयिष्यामि किल्बिषात् ।।७८
श्री भगवानुवाच
यस्तु गायति संयुक्तं कैशिकं विष्णुसंसदि
स तारयति दुर्गाणि श्वपाको राक्षसं यथा ।।७९
एवं तत्र वरं गृह्य राक्षसो ब्रह्मसंस्थितः

जातस्तु विमले वंशे यथा शरदि चंद्रमाः ।।८०
श्वपाकश्चापि सुश्रोणि मम चैवोपगायकः
कृत्वा तु विपुलं कर्म सब्रह्मत्वमुपागतः ।।८१
एतद्गीतफलं देवि कथितंतु समासतः
यस्तु गायति सुश्रोणि कौमुद्यां द्वादशीं पुमान्
सर्वसंगपरित्यक्तो मम लोकं स गच्छति ।।८२

इति श्री वराहपुराणे भूवराहसंवादे
कैशिकोपाख्यानं नाम षट्षष्टितमोऽध्यायः

भट्टर् तिरुवडिकळे शरणम्

य एतस्य प्रभावं वै पठेद्वा शृणुयादपि
स सप्तजन्मसंतारं प्राप्नुयान्नात्र संशयः ।।

IIIIIIIIIIIII

मं ना रामानुजः